# shrIbhujangaprayAtAShTakam

# श्रीभुजङ्गप्रयाताष्टकम्

## Document Information

Text title : bhujangaprayAtAShTakam

File name : bhujangaprayAtAShTakam.itx

Category : aShTaka, vishhnu, krishna, bhujanga, vishnu, puShTimArgIya

Location : doc_vishhnu

Author : Hariraya

Proofread by : PSA Easwaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीभुजङ्गप्रयाताष्टकम्

सदा गोपिकामण्डले राजमानं लसन्नृत्यबन्धादिलीलानिदानम् ।
गलद्दर्पकन्दर्पशोभाभिदानं भजे नन्दसूनुं सदानन्दरूपम् ॥ १॥

व्रजस्त्रीजनानन्दसन्दोहसक्तं सुधावर्षिवंशीनिनादानुरक्तम् ।
त्रिभङ्गाकृतिस्वीकृतस्वीयभक्तं भजे नन्दसूनुं सदाऽऽनन्दरूपम् ॥ २॥

स्फुरद्रासलीलाविलासातिरम्यं परित्यक्तगेहादिदासैकगम्यम् ।
विमानस्थिताशेषदेवादिनम्यं भजे नन्दसूनुं सदाऽऽनन्दरूपम् ॥ ३॥

स्वलीलारसानन्ददुग्धोदमग्नं प्रियस्वामिनीबाहुकण्ठैकलग्नम् ।
रसात्मैकरूपाऽवबोधं त्रिभङ्गं भजे नन्दसूनुं सदाऽऽनन्दरूपम् ॥ ४॥

रसामोदसम्पादकं मन्दहासं कृताभीरनारीविहारैकरासम् ।
प्रकाशीकृतस्वीयनानाविलासं भजे नन्दसूनुं सदाऽऽनन्दरूपम् ॥ ५॥

जितानङ्गसर्वाङ्गशोभाभिरामं क्षपापूरितस्वामिनीवृन्दकामम् ।
निजाधीनतावर्तिरामातिवामं भजे नन्दसूनुं सदाऽऽनन्दरूपम् ॥ ६॥

स्वसङ्गीकृताऽनन्तगोपालबालं वृतस्वीयगोपीमनोवृत्तिपालम् ।
कृतानन्तचौर्यादिलीलारसालं भजे नन्दसूनुं सदानन्दरूपम् ॥ ७॥

घृताद्रीशगोवर्धनाधारहस्तं परित्रातगोगोपगोपीसमस्तम् ।
सुराधीशसर्वादिदेवप्रशस्तं भजे नन्दसूनुं सदाऽऽनन्दरूपम् ॥ ८॥

॥ इति श्रीहरिरायविरचितं भुजङ्गप्रयाताष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*